# वारिधे दूयते हृदयम्

‘सागरा प्राण तळमळला’ या वीर सावरकरकृत गीताचा संस्कृत भावानुवाद

रे सरित्पते प्रापय मां जनुभूमिम्। वारिधे दूयते हृदयम् ॥
भूमातुर्मे चरणतलं स्नपयन्तम् । त्वां सिंधो नित्यमपश्यम् ॥
बहु भवता मे देशान्तरमुपदिष्टम् । बहु विततं भुवि वैविध्यम् ॥
हृन्मातुर्मे विरहशंकितं खिन्नम् । तव वचसि किन्तु विश्वस्तम् ॥
अहमयनज्ञो वहे सुतं ते पृष्ठम् । आनयामि तमपि च शीघ्रम् ।
इति समादृत्य ते वचनम् । समवाप्य भूरि सामर्थ्यम् ॥
जननि ते करोम्युद्धरणम् ।
आमंत्र्य मया मातृचरणमन्तरितम् । वारिधे दूयते हृदयम् ॥ १ ॥
शुक एणो वा पंजर इव निगडे वा । वंचितस्तथाऽहं बद्धः ॥
भूविरहरुजा सह्या मे कथमधुना ।तिमिराक्ता जगती कृत्स्ना ॥
गुणसुमनानां कृतं मया संधानम् । स्यान्मातुर्मम सौरभ्यम् ॥
यदि मातुर्मे न चेदनेनोद्धरणम् । व्यर्थं तद् विद्याविभवम् ॥
सा पादपाम्रवत्सलता ।नवकुसुमसंयुता लतिका ॥
नवजपापुष्पतनुकलिका ।
सुमनानि तथा हन्त सर्वमन्तरितम् । वारिधे दूयते हृदयम् ॥२॥
रवे ताराणां यदपि राजते माला । मे प्रेष्ठा भारततारा ॥
इह विद्यन्ते सौधा यद्यपि भव्याः । मातुर्हि मे कुटी रुच्या ॥
अपि साम्राज्यं वरं न जननीरहितम् । मे प्रियं मातृवनवसनम् ॥
अलमिदं वंचनं व्यर्थम् । दीनं मे चित्तं व्यथितम् ॥
सरिता ते हारि कलत्रम् ।
तद्विरहरुजं स्मर मे शपथोच्चारम् ।वारिधे दूयते हृदयम् ॥३ ॥
रे निर्दय ते फेनव्याजं हसनम् । किं मिथ्या कुरुषे वचनम् ॥
यत्स्वामित्वे वससि सांप्रतं सिंधो । भयमांग्लभुवस्ते बंधो ॥
किं वंचयसे मत्वा मातरमबलाम् । निर्वसनं दंडयसे माम् ॥
आंग्लभूमिसाध्वसबुध्दे । सबला मे जननी जलधे ॥
घटजनुषे वृत्तं कथये ।
ते सकलजलं येनाचमने पीतम् । वारिधे दूयते हृदयम् ॥४॥

*****

वैद्य श्रीनिवास पु. हिर्लेकर (By: Vaidya Shriniwas P. Hirlekar)